शब्दं न युञ्जीत पितृत्वं चोपजायते इत्युक्तम् । अतएव विष्णुना प्रेतस्य नामगोत्राभ्यां दत्ताक्षय्योदकेषु इत्यत्र प्रेतनामगोत्राभ्यामित्यनेन प्रेतस्येत्युक्तं न तु सम्बन्धिन इत्युक्तम् । ततश्च मन्त्रे प्राप्तपितृलोकोपाधिकएव पितृपदस्थाने प्रेतपदोहो न तु अग्निष्वात्ताद्युपाधिके एवमभिलापवाक्येऽपि सम्बन्धित्वेन नोल्लेखः किन्तु प्रेतत्वेन असम्बन्धिनोऽपि मठच्छात्रादेरपि प्रेतश्राद्धाधिकारित्वात् । सांवत्सरिकश्राद्धे एकोद्दिष्टविकृतीभूतेऽपि प्राप्तपितृलोकोपाधिकपितृपदवन्मन्त्रे अभिलापे च सम्बन्धिबोधकपितृत्वेनैवोल्लेखः । एवञ्च देवताभ्यः पितृभ्यश्च इत्यत्र न प्रेतपदोहः पितृपदस्य दिव्यपितृपरत्वात् । एवं नैकवचनोहोऽपि तथा मधु द्यौरस्तु नः पिता इत्यस्य द्यौः स्वर्गः पिता पितेव सर्व्वस्याधिगम्यत्वात् मध्वस्तु मधुमयी भवत्विति भाष्यव्याख्याने द्यौरिति पितेति पदयोः सामानाधिकरण्यं प्रतीयते अत्र च द्युलपितृत्वयोर्भेदेऽपि सामानाधिकरण्येनाभेदावगमात् दिवः पितृसाधर्म्म्यप्राप्तिरिति पितृपदं पितृतुल्यपरं न तु जनकपरं प्राप्तपितृलोकपरं वेति । तेनात्र मन्त्रे पितेत्येव वक्तव्यं न तु प्रेतपदोहः । न वा पितृशब्दं न युञ्जीत इत्यनेन निषेधः । एवमामावेति मन्त्रे पितरा इत्यत्र नोहः । एवं वृद्धिश्राद्धेऽप्येतेषु नान्दीमुखविशेषणं न देयमेवेति । अन्यत्र सर्व्वोत्सर्गवाक्ये मन्त्रे च पितृपदप्रयोगनिषेधात् प्रेतपदोहः कार्य्यः । विष्णुः । एकवन्मन्त्रानूहेत एकोद्दिष्टे इति एकवत् एकवचनवत् यथा स्यात्तथोहेत यथा पवित्रे स्थो वैष्णव्यावित्यत्र पवित्रासि वैष्णवीति एवं विष्णोर्मनसा पूते स्थ इत्यत्रापि पूतमसीति । अत्र पितरो मादयध्वं यथाभाग मा वृषायध्वं इति मन्त्रे अत्र प्रेत मादयस्व यथाभाग मा वृषायस्व इत्यूह्यम् । अमी मदन्तः पितर इत्यत्र अमी मदत् प्रेत इति । वृषायिषत इत्यत्र वृषायिष्टेति । एत पितर इति पिण्डार्थावाहनमन्त्रे एहि प्रेत इति । सौम्यास इत्यत्र सौम्येति । दत्तास्मभ्यमित्यत्र देह्यस्मभ्यमिति । नियच्छत इत्यत्र नियच्छेति । नमो व इत्यादिमन्त्रेषु पितर इति स्थानचतुष्टये प्रेतेत्यूह्यम् । एवं व इत्यत्र ते इति । आशीःप्रार्थने येभ्य इत्यत्र यस्मै इति । तेषामित्यत्र तस्येत्यूह्यम् । एतद्वः पितर इत्यत्र तु प्रेता इति विकृतावूहो न तु बहुवचनस्य । एतद्वः पितरो वास इति जल्पन् पृथक् पृथक् इति ब्रह्मपुराणेन प्रकृतावेव पार्व्वणे पित्रादिषु प्रत्येकमेतद्वः पितर इति बहुवचनान्तमन्त्रप्रयोगात् अत्रानर्थक्येन तद्विकृतावेकोद्दिष्टेऽप्यसमवेतार्थबहुवचनस्यैव युक्तत्वात् । ततश्च प्रकृतौ समवेतार्थस्यैव विकृतावूहः । सांवत्सरिके त्वेकवचनस्यैवोहो न तु पितृपदस्य तत्र प्राप्तपितृलोकत्वेन तस्यैव युक्तत्वात् । स्मृतिः ।
"प्रेतश्राद्धे यदुच्छिष्टं गृहे पर्य्युषितञ्च यत् ।
दम्पत्योर्भुक्तशेषञ्च न भुञ्जीत कदाचन" ॥
उच्छिष्टं पाकपात्रे अवशिष्टम् । गृहे उपरागे पर्य्युषितं स्थितम् । दम्पत्योराश्रमस्वामिनोर्भोजनानन्तरं पाकस्थाल्यामवशिष्टमिति श्राद्धचिन्तामणिः ॥ यत्तु देवलवचनम् ।
"एकोद्दिष्टस्य शेषन्तु ब्राह्मणेभ्यः समुत्सृजेत् ।
पश्चात् स्वयञ्च भुञ्जीत पुनर्मङ्गलभोजनम्" ॥
इति । तस्यैकोद्दिष्टशेषं ब्राह्मणेभ्यः समुत्सृजेत् न त्ववशेषयेत् पुनर्मङ्गलभोजनं पाकान्तरकृतान्नं भुञ्जीतेत्यन्वय इति ॥ * ॥ तत्करणकालो यथा । ब्रह्मपुराणम् ।
"पूर्व्वाह्णे मातृकं श्राद्धमपराह्णे तु पैतृकम् ।
एकोद्दिष्टन्तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्" ॥
मध्याह्ने तु विशेषमाह कालमाधवीये व्यासः ।
"कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् ।
आवर्त्तनसमीपे वा तत्रैव नियतात्मवान्" ॥
आवर्त्तनं पश्चिमदिगवस्थितच्छायायाः पूर्व्वदिग्गमनारम्भकालः । तत्समीपे कुतपशेषखण्डे ।
यदाह गोतमः ।
"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्" ।
तेन पूर्व्वदिवसीयकुतपरौहिणयोस्तत्तिथिर्लाभे परत्र कुतपमात्रलाभे शुक्लपक्षेऽपि पूर्व्वदिने एकोद्दिष्टं उभयप्राप्त्यनुरोधात् । पूर्व्वदिने कुतपालाभे परत्र तल्लाभे कृष्णपक्षेऽपि परदिनएव समाप्तिकालादारम्भकालस्य बलवत्त्वात् । तथा च बौधायनः ।
"यो यस्य विहितः कालः कर्म्मणस्तदुपक्रमे ।
तिथिर्याभिमता सा तु कार्य्या नोपक्रमोज्झिता" ॥
उभयत्र कुतपमात्रालाभे शुक्लपक्षेऽपि पूर्व्वदिने समाप्तिकालानुरोधात् पूर्व्वदिने रौहिणालाभे परत्र सप्तममुहूर्त्तलाभे कृष्णपक्षेऽपि परदिने मध्याह्नानुरोधात् । इति श्राद्धतत्त्वम् ॥ * ॥ एकोद्दिष्टविधिकसांवत्सरिकश्राद्धम् । यथा,—
"एकोद्दिष्टं पुरावृत्तं तद्विशेषं वदे शृणु" ।
प्रथमं निमन्त्रणं पादप्रक्षालनं आसनं अद्य अमुकगोत्रस्य मत्पितुरमुकदेवशर्म्मणः प्रतिसांवत्सरिकमेकोद्दिष्टं श्राद्धं सिद्धान्नेन युष्मास्वहं करिष्ये श्राद्धकरणानुज्ञापनम् । आसनं अर्घ्यं । गन्धादिदानं नित्यश्राद्धम् । अन्नसङ्कल्पनं जप्यं निवीती उत्तराभिमुखीभूयातिथिश्राद्धं कुर्य्यात् । ततस्तृप्तिं ज्ञात्वा दक्षिणाभिमुखो वामोपवीती उच्छिष्टसमीपे ये अग्निदग्धा इति अन्नविकिरणम् । ॐ अमुकगोत्र मत्पितरमुकदेवशर्म्मन् एतत्ते जलमवने निक्ष्व ये चात्र त्वामनुयांश्च त्वमनु तस्मै ते स्वधा । इति रेखोपरि दक्षिणामुखवारिधारादानम् । इति गारुडे २२३ अध्याय ॥

एकोशिका, स्त्री, (एका मुख्या उशिका कमनीया ।) वृक्षविशेषः । इति रत्नमाला ॥ आक्रादि इति भाषा ॥

एज, ऋ ङ दीप्तौ इति कविकल्पद्रुमः ॥ (भ्वादिं-आत्मं-अकं-सेट् ।) ऋ मा भवान् एजिजत् । ङ एजते । इति दुर्गादासः ।

एज, ऋ कम्पे । इति कविकल्पद्रुमः । (भ्वादिं-परं-सकं सेट् ।) ऋ मा भवान् एजिजत् । एजति वायुना वृक्षः । इति दुर्गादासः ॥

एठ, ङ बाधने । इति कविकल्पद्रुमः ॥ (भ्वादिं-आत्मं सकं-सेट् ।) बाधनं विहतिः । ङ एठते बत्सरं लोकः । इति दुर्गादासः ॥

एडः, त्रि, (इलति । इल स्वप्ने । अच् । डलयोरैक्यम् । यद्वा आ सर्व्वतः ईड्यते । ईड स्तुतौ । घञ् ।) बधिरः । इत्यमरः ॥
(मेषः । यथाह कात्यायनः ।
"ऐडवराहेभ्यूदधारा प्राचीदं विष्णुः" ॥)

एडकः, पुं, (एड + स्वार्थे कन् । यद्वा इलति एलयति वा इल + ण्वुल् ।) मेषः । इत्यमरः ॥ वनच्छागलः । इति त्रिकाण्डशेषः ॥

एडका, स्त्री, (एडकस्य स्त्री । अजादित्वात् टाप् । क्षिपकादित्वान्नेत्वम् ।) मेषी । इत्यमरटीकायां रायमुकुटः ॥

एडगजः,पुं, (एडो मेष एव गजो यस्य मल्लकत्वात् ।) चक्रमर्द्दकः । इत्यमरः ॥ चाकुन्दिया इति भाषा । अस्य गुणाः । वायुकफकुष्ठत्वग्दोषगुल्मोदररोगार्शोनाशित्वम् । कटुत्वञ्च । इति राजवल्लभः ॥ (पर्य्यायः यथा,—
"चक्रमर्द्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः ।
पद्माटः स्यादेडगजश्चक्री पुन्नाट इत्यपि" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाश्चास्य चक्रमर्द्दशब्दे ज्ञेयाः ॥
व्यवहारो यथा,—
"सलोमशः सैडगजः करञ्जः" ।
इति चरके सूत्रस्थाने तृतीयेऽध्याये ॥)

एडमूकः,त्रि, (एडो बधिरो मूकश्च ।) बधिरः मूकश्च । वक्तुं श्रोतुमशिक्षितः । वाक्श्रुतिवर्जितः । इत्यमरः ॥ शठः । इति मेदिनी ॥

एडूकं, क्ली, (ईड + उलूकादयश्चेति ४ । ४१ । उणादिसूत्रेण साधु । निपातनात् ह्रस्वम् ।) एडूकम् । इति भरतो द्विरूपकोषश्च ॥

एडूकं, क्ली, (ईड्यते इति । "उलूकादयश्च" ४ । ४१ । उणादिसूत्रेण साधु ।) अन्तर्न्यस्तकीकसकुड्यम् । इत्यमरः । कीकसमिव कीकसं यत् कुड्यम् छिटाबेड़ा इति ख्यातमित्यन्ये । इति सारसुन्दरी ॥ कीकसमस्थि एतत् काष्ठादिकठिनद्रव्योपलक्षणं कीकसमिव कीकसं किलिञ्जादीति मधुः ॥
"मध्यसंस्थापितास्थ्यादि कुड्यमेडूकमुच्यते" ।
इति माधवः ॥ (यथा महाभारते वनपर्व्वणि ।
"एडूकचिह्ना पृथिवी न देवगृहभूषिता" ॥
अस्य शब्दस्य पुंस्त्वमपि दृश्यते महाभारते ३ । १९० । ६३ । यथा,—
"एडूकान् पूजयिष्यन्ति वर्जयिष्यन्ति देवताः ।
शूद्राः परिचरिष्यन्ति न द्विजान् युगसंक्षये" ॥)

एडोकं, क्ली, एडूकम् । इति भरतधृतद्विरूपकोषः ॥

एणः, पुं स्त्री, (एति द्रुतं गच्छतीति । इ + बाहुलकात् णः ।) हरिणः । इति राजनिर्घण्टः ॥ मृगविशेषः । इत्यमरः ॥ अस्य मांसगुणाः । कषायत्वम् । मधुरत्वम् पित्तरक्तकफज्वरनाशित्वम् । संग्राहित्वम् । रोचनत्वम् । हृद्यत्वम् । बलकारि-